## परिपन्थं च तिष्ठति। (३६/१५८६)

परिपन्थशब्दात् तद् इति द्वितीयासमर्थात् तिष्ठति इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। परिपन्थं तिष्ठति[1] पारिपन्थिकश्चौरः। चकारो भिन्नक्रमः प्रत्ययार्थं[2] समुच्चिनोति। परिपन्थं [3]हन्ति पारिपन्थिकः। समर्थविभक्ति-प्रकरणे पुनर्द्वितीयोच्चारणं लौकिकवाक्यप्रदर्शनार्थम्। [4]परिपथशब्दपर्यायः परिपन्थशब्दोऽस्ति [5]इति ज्ञापयति। स विषयान्तरेऽपि प्रयोक्तव्यः॥

## माथोत्तरपदपदव्यनुपदं धावति। (३७/१५८७)

[6]माथशब्दोत्तरपदात् प्रातिपदिकात् पदवी अनुपद इत्येताभ्यां च धावति इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। दण्डमाथं धावति दाण्डमाथिकः। [7]शौल्कमाथिकः। पादविकः। आनुपदिकः। माथशब्दः पथिपर्यायः॥

## आक्रन्दाट् ठञ् च। (३८/१५८८)

आक्रन्दन्ति एतस्मिन्नित्याक्रन्दो देशः। अथ वा आक्रन्द्यते इत्याक्रन्दः [8]आर्तायनमुच्यते। विशेषाभावाद् द्वयोरपि ग्रहणम्। आक्रन्दशब्दात् [9]तद् इति द्वितीयासमर्थाद् धावति इत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति, चकाराट् ठक् [10]च। स्वरे विशेषः। आक्रन्दं धावति आक्रन्दिकः। [11]आक्रन्दिकी॥

## पदोत्तरपदं गृह्णाति। (३९/१५८९)

पदशब्दः उत्तरपदं यस्य तस्मात् पदोत्तरपदशब्दात् तद् इति [12]द्वितीयासमर्थाद् गृह्णाति इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। पूर्वपदं गृह्णाति पौर्वपदिकः। औत्तरपदिकः[13]। पदान्तात् इति नोक्तं, [14]बहुच्पूर्वान्मा भूत् इति॥

## प्रतिकण्ठार्थललामं च। (४०/१५९०)

प्रतिकण्ठार्थललामशब्देभ्यः [15]तद् इति द्वितीयासमर्थेभ्यः गृह्णाति इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। प्रति-कण्ठं गृह्णाति [16]प्रातिकण्ठिकः। [17]आर्थिकः। [18]लालामिकः॥

## धर्मं चरति। (४१/१५९१)

धर्मशब्दात् [19]तद् इति द्वितीयासमर्थाच् चरति इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। चरतिरासेवायां नानु-ष्ठानमात्रे। धर्मं चरति धार्मिकः।

[४८८] अधर्माच्चेति वक्तव्यम्। (म. भा. २.३३१)

[20]आधर्मिकः॥

---

1. हन्ति वा इत्यधिकम् ड. 2. च इत्यधिकम् ड. 3. तिष्ठति हन्ति वा ड. 4. परिपथपर्यायः ह. 5. इति नास्ति फ. 6. माथोत्तरपदात् ब. ह. 7. शौलमाथिकः फ. 8 आर्तायम् ह. 9. तदिति नास्ति इ. 10. च नास्ति ब. 11. नास्ति ब. 12. द्वितीयासमर्थात् नास्ति फ. 13. पदोत्तरं च पदं च इत्यन्ये। तेन पदं गृह्णाति इति पादिकः इत्यधिकम् क. ड. 14. बहुपूर्वात् ह. 15. तद् इति नास्ति ह. 16. प्रातिकण्ठिकं ह. 17–18. नास्ति फ. 19. तद् इति नास्ति फ. ह. 20. अधर्मं चरति इत्यधिकम् ब. क. ड. इ.